# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्
# सत्रान्तपरीक्षा – २०२१

| | | |
|---|---|---|
| कक्षा – शास्त्री | प्रश्नपत्रम् – १ | गुणाः – ५० |
| विषयः – अनिवार्यसंस्कृतम् | सत्रम् – ६ | समयः – १०:०० तः १२:०० |
| दिनाङ्कः – १३/०७/२०२१ | सन्दर्भग्रन्थः –तर्कभाषा | |

**सूचना - निम्नलिखितेषु दशप्रश्नेषु केचन पञ्च प्रश्नाः विधेयाः।**
**प्रत्येकं प्रश्नस्य समानगुणाः। (१०)**

**प्रश्नः १ निम्नलिखितेषु द्वयोः व्याख्यां लिखत।**

१ बालोऽपि यो न्यायनये प्रवेशम् अल्पेन वाञ्छत्यलसः श्रुतेन।
सङ्क्षिप्तयुक्त्यन्विततर्कभाषा प्रकाश्यते तस्य कृते मयैषा।।

२ शास्त्रप्रवृत्तिभेदाः।

३ अयुतसिद्धसम्बन्धः।

**प्रश्नः २ कारणत्रैविध्यं सोदाहरणं विवृणुत।**

**प्रश्नः ३ अनधिगतार्थगन्तृत्वं प्रमाणमिति प्रमाणलक्षणं खण्डयत।**

**प्रश्नः ४ निम्नलिखितेषु द्वयोः व्याख्यां लिखत।**

१ सविकल्पकप्रत्यक्षम्।

२ निर्विकल्पकप्रत्यक्षम्।

३ द्विविधमनुमानम्।

**प्रश्नः ५ षड्विधसन्निकर्षान् सोदाहरणं परिचाययत।**

**प्रश्नः ६ हेतोः त्रैविध्यं यथाग्रन्थं विवृणुत।**

**प्रश्नः ७ निम्नलिखितेषु द्वयोः व्याख्यां लिखत।**

१ उपमित्युत्पत्तिप्रकारः।

२ हेतोः पञ्चरूपाणि।

३ पदलक्षणम्।

**प्रश्नः ८ आकाङ्क्षा-योग्यता-सन्निधीनां वाक्यार्थज्ञाने कारणत्वं स्पष्टं विशदीकुरुत।**

**प्रश्नः ९ प्रमाणत्रयस्य कार्यकारणभावं सङ्क्षेपेण लिखत।**

**प्रश्नः १० निम्नलिखितेषु दशप्रश्नानाम् अतिलघूत्तराणि लिखत।**

१ तर्कभाषायाः कर्ता कः?
२ न्यायदर्शने प्रमाणानि कति?
३ चक्षुषा घटप्रत्यक्षजनने सन्निकर्षः कः?
४ साक्षात्कारिप्रमाकरणं किम्?
५ द्रव्यलक्षणं किम्?
६ तन्तुरूपं पटरूपस्य कीदृशं कारणम्?
७ स्वप्रतिपत्तिहेतुः कीदृशमनुमानम्?
८ का नाम अनुमितिः?
९ अन्वयव्यतिरेकिहेतुः कः?
१० कः पक्षः?
११ के हेत्वाभासाः?
१२ अवयवावयविनोः सम्बन्धः कः?
१३ सव्यभिचारः कतिविधः?
१४ किं नाम पदम्?
१५ वह्निना सिञ्चतीति वाक्यं प्रमाणं न वा?

****